Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 3 | ISSN : 2581- 6306

# नियतोपस्थितिकार्थविचारः



**डॉ. मनीष शर्मा**
**सचिवः,**
**छत्तीसगढ संस्कृतशिक्षा सेवासंस्थान, भारतम्।**

**सारांशः -** नवीनवैयाकरणाः नियतोपस्थितिकत्वं प्रातिपदिकार्थत्वमिति न स्वीकुर्वन्ति। अपितु नागेशभट्टाः प्रवृत्तिनिमित्ततदाश्रयत्वरुपमेव प्रातिपदिकार्थत्वं स्वीकुर्वन्ति। अस्मिन् विषये नागेशेनोक्तं लघुशब्देन्दुशेखरे **परे त्वत्र सूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्च तेषामाशयश्च** तेषामाशयः प्रातिपदिकार्थपदार्थेन प्रवृत्तिनिमित्तं तदाश्रयश्च तेषामाशयः । भाष्यप्रामाण्येन त्रिकं चतुष्कं पञ्चकं वा प्रातिपदिकार्थः स्वीकारे सति लिङ्गग्रहणं व्यर्थं तथा च द्विकं प्रातिपदिकार्थस्याङ्गीकारे लिङ्ग्रहणं सार्थकमिति विचार्यते। अपि च सरुपसूत्रभाष्ये जातिविशिष्टव्यक्तेरेव प्रातिपदिकार्थत्वं कथ्यते। तथाहि **सरुपाणामेकशेषएकविभक्तौ** इति सूत्रे भाष्यकारेणोक्तं **नह्याकृतिपदार्थस्य द्रव्यं न पदार्थः द्रव्यपदार्थस्याकृतिर्न पदार्थः** इत्युक्ते सति किञ्चित् प्रधानं वर्तते अन्यदुत्तरभाष्ये विहितं पूर्वोक्तनुसारेण तत्र शब्दानां जातिविशिष्टव्यक्तावेव शक्तिबोधकं तेन च विशिष्टं नामार्थः सङ्गच्छते। अतः जाति तदाश्रयश्च प्रातिपदिकार्थः।

**मुख्याधियेवाचकः** – प्रवृत्तिनिमित्ततदाश्रयः, नामार्थः, प्रातिपदिकार्थः, गौर्वाहिकः, जातिविशिष्टव्यक्तिः, शक्यतावच्छेदकः, संसर्गमर्यदा, अनेकसमवेतत्वम्, नियतोपस्थितिकार्थः।

नियतोपस्थितिकः पदार्थोऽयं समस्तः, नियता व्यापिका उपस्थितिर्यस्यार्थस्य सोऽर्थः नियतोपस्थितिकः। अत्र षष्ठ्यर्थे बहुव्रीहिसमासः विग्रहे यच्छब्दस्यार्थः यदर्थो गृह्यते, यस्य पदार्थस्य ङस् प्रत्ययस्य विषयत्वमर्थः। यत्प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेन विषयत्वरुपे षष्ठ्यर्थेऽन्वयः। तथा च षष्ठ्यर्थस्य निरुपकत्वसम्बन्धेनोपस्थितावन्वयः। यदर्थविशिष्टनिरुपितोपस्थितिर्नियता सोऽर्थः प्रातिपदिकार्थः यदर्थवैशिष्ट्यं विषयतायां निष्ठत्वसम्बन्धेन, विषयतावैशिष्ट्यञ्चोपस्थितौ निरुपकत्वसम्बन्धेन ज्ञेयम्। अत्र न्युपसर्गात् यम् धातोः क्तप्रत्यये सति नियतपदार्थस्य व्युत्पत्तिर्भवति। न्युपसृष्टात् यम् धातोः नियमनमर्थः स्वीक्रियते नियमनं नाम व्यापनम् तच्च व्याप्त्यनुकुलो व्यापारः

तथा चोक्तं **फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**[1] क्तप्रत्ययार्थः कर्तृरुपः। यदि निपूर्वकयम् धातोः सकर्मकत्वात् **तयोरेवकृत्यक्तखलर्थाः** [2] सूत्रेण कर्मण्येव क्तप्रत्ययः स्यात् चेत् कथ्यते **गत्यर्थाकर्मकश्लिषशीङस्थावसजनरुहजीर्यतिभ्यश्च** [3] अस्मिन् सूत्रे चकारः समुच्चायकः नास्ति एतादृशानां धातूनामपि क्तप्रत्ययस्य विधायकं सूत्रं **नपुंसके भावे क्तः**[4] सूत्रेण विधीयमानः क्तप्रत्ययः सकर्मकधातोरेव भवति। तत्र च व्युत्पत्तिः नियमनं नियतमिति विग्रहः कर्तुं शक्यः पश्चात् मत्वर्थीयः अच् प्रत्ययः नियतमस्ति यस्यामुपस्थितौ सा नियतोपस्थितिरिति व्युत्पत्तौ

नियतपदार्थस्यार्थः व्याप्त्यानुकूलो व्यापारः क्तप्रत्ययस्यार्थः कर्तृरुपः तस्य आश्रयैकदेशान्वयः निरुपितत्वसम्बन्धेन भवति। किन्तु पदार्थः पदार्थेऽन्वेति न तु पदार्थैकदेशे इति नियमः, तेन व्युत्पतिविरोधः समागच्छति अत एव तथान्वयः न सम्यक् वर्तते। तथापि नित्यसाकाङक्षायां तु अन्वयः भवत्येव यथा देवदत्तस्य गुरुकुलम् अत्रैकदेशान्वयः सङगच्छते तथैव कर्तृरुपः क्तप्रत्ययार्थस्य आश्रयत्वैकदेशेऽन्वये सति नास्ति दोषः। तदुक्तं भट्टोजिदीक्षितैः मनोरमायाम् –

**सम्बन्धिशब्दो सापेक्षो नित्यं सर्वः समस्यते ।**
**वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ।।**
**समुदायेन सम्बन्धो येषां गुरुकुलादिना ।**
**संस्पृश्याऽवयवांस्ते तु युज्यन्ते तद्वता सह ।।**[5]

नियतपदार्थस्य बोधः व्याप्त्यनुकूलव्यापाराश्रयत्वेन भवति तदेव व्यापक इत्युच्यते व्याप्नोतीति व्यापकः यथा वह्निः धूमं व्याप्नोति तस्माद् वह्निः व्यापकः अपि च धूमं व्याप्यमिति तथैव अत्रापि व्याप्त्यनुकूलव्यापाराश्रयत्वेन नियतपदार्थस्य बोधः तदेव व्यापिका इत्यपि वक्तुं शक्यते यदर्थनिष्ठविषयतानिरुपकोपस्थिति व्यापिका नियता सोऽर्थः प्रातिपदिकार्थः कथ्यते। केन प्रकारेण व्यापकीभूतः स्वीकार्यः इत्यत्र भ्रमः तदा नियतपदार्थत्वेन व्यापक अर्थः निरुपितत्वसम्बन्धेन व्याप्तौ साकाङक्षत्वात् यतः प्रातिपदिकात् प्रथमा आयाति। तेन प्रकारेणैव प्रातिपदिकस्यैव व्याप्तिः बोधः गृहीतुं शक्यते। अनेन व्याप्यतानिरुपितव्यापकताश्रयीभूतोपस्थितिर्यमर्थं बोधयति सोऽर्थः प्रातिपदिकार्थ इत्यायातम्। किन्तु अत्र सन्देहः व्याप्यव्यापकयोः समानाधिकरणेन बोधः परिज्ञातः, किन्तु व्याप्यीभूतस्य प्रातिपदिकस्य अधिकरणत्वेन तु आकाशस्य समवायसम्बन्धेन बोधः स्यात्। अपि च व्यापिकायाः तु उपस्थितेः समवायसम्बन्धेन अधिकरणात्मा इत्यस्य बोधः तर्हि अनयोः व्याप्यव्यापकयोः बोधः कथं सङगच्छते

[1] वैयाकरणभूषणसारः कारिकासंख्या पृष्ठसंख्या 11

[2] पाणिनीय अष्टाध्यायी सूत्रसंख्या– 3–4–70

[3] पाणिनीय अष्टाध्यायी सूत्रसंख्या– 3–4–72

[4] पाणिनीय अष्टाध्यायी सूत्रसंख्या– 3–3–117

[5] प्रौढमनोरमा हलन्तपुल्लिङ्गप्रकरणम् पृष्ठसंख्या 493

तदोच्यते समवायसम्बन्धेन शब्दरुपप्रातिपदिकस्य अधिकारणमाकाशं वर्तते। तथापि व्याप्यतावच्छेकत्वेन सम्बन्धः न स्वीकृतः। अपि तु स्वविषयकश्रावणप्रत्यक्षसमवायित्वसम्बन्धेन व्याप्यतावच्छेदकसम्बन्धः स्वीकृतः तेन शब्दप्रातिपदिकाधिकरणं तु आत्मैव आकाशः तु भवितुमेव नार्हति। अनयोः व्याप्यव्यापकयोः समानाधिकरण्यं तु समीचीनमेव इति। व्याप्यता तन्निरुपितसमवायसम्बन्धावच्छिन्नोपस्थितित्वावच्छिन्नोपस्थितिनिष्ठव्याप्यता तादृशव्यापकतावदुपस्थितिविषयीभूतोऽर्थः प्रातिपदिकार्थः न्यायशास्त्रानुसारेण ज्ञायते ।

दीपककारस्य विचारः - प्रत्यर्थं शब्दाभिनिवेशः इति भाष्यप्रामाण्येनार्थज्ञानाय शब्दानां प्रयोगः विधातव्य इत्यभियुक्तवचनस्वीकारेण च यस्मिन् प्रातिपदिके उच्चारिते सति इति नागेशस्य व्याख्याने स्वार्थं ज्ञापयति बोधस्यावशिष्टत्वं बोध्यते। वाक्ये उपस्थितिपदार्थस्य विषयतामेव स्वीकारः व्युत्पत्तिवादग्रन्थे **शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते**[6] अत्र ज्ञानार्थकभासधातोः विषयतार्थकत्वमेव स्वीकारः बोधः शिवदत्तमिश्रैः कथितम् **शाब्दबोधे इत्यत्र निरुपितत्वं सप्तम्यर्थस्तस्य भास्धात्वर्थविषयतायामन्वयः ।**[7] निपूर्वकयम् धातोः व्यापकत्वमर्थोऽपि च व्यापकत्वांशे साकाङ्क्षत्वेनोपस्थितिसत्वाच्च नित्यत्वेन

स्वार्थज्ञाननिरुपितत्वं स्वीक्रियते। अत्र स्वार्थस्यार्थः प्रवृत्तिनिमित्तम्। तथा च बोधस्योपस्थितिः तेन प्रातिपदिकप्रवृत्तिनिमित्तविषयकोपस्थितिव्यापकविषयताश्रयत्वं प्रातिपदिकमिति अङ्गीक्रियते। उपस्थितिव्यापकत्वं तथाहि– उपस्थितिनिष्ठाभावप्रतियोगिता– निरुपितनिरुपकत्ववैशिष्ट्येन तत्सम्बन्धावच्छिन्नावच्छेदकस्याभावरुपमपि च नियतलिङ्गस्थले यथा घटादौ घटपदस्य घटत्वमेव प्रवृत्तिनिमित्तमस्ति तथा च घटप्रातिपदिकप्रवृत्तिनिमित्तघटत्वविषयकस्योपस्थितौ निरुपकत्ववैशिष्ट्येन पुंस्त्वविषयता सत्वात् घटत्वविषयोपस्थितिः निरुपकत्वसम्बन्धेन पुंस्त्वविषयता नास्ति एतादृशी साक्षात्प्रतीतिनिरुपकत्वेन तद्सम्बन्धावच्छिन्नविशेषणकपुंस्त्वविषयतावच्छेदकताक– भेदस्यासत्वेन पुंस्त्वविषयताघटप्रातिपदिकप्रवृत्तिनिमित्तविषयोपस्थितिनिष्ठाभाव– प्रतियोगितायाः नास्ति तदवच्छेदकत्वं तदाश्रयत्वाच्च लिङ्गस्य घटादिप्रातिपदिकार्थत्वं सिद्धीर्भवति ।

अभिनवचन्द्रिकाटीकाकारैः कथितम् प्रातिपदिककर्मोच्चारणं व्याप्यं तच्चोच्चारणत्वं व्याप्यतावच्छेदकत्वमुच्यते तत्र च **यस्मिन् प्रातिपदिके उच्चारिते सति यस्यार्थस्य नियमेनोपस्थिति**[8] इति शेखरकारेण प्रमाणरुपेण उपस्थापितं स्वजन्यश्रावणप्रत्यक्षसमवायित्वसम्बन्धो व्याप्यतावच्छेदकतया स्वीकृता उच्चरितप्रातिपदिकत्वापेक्षया प्रातिपदिककर्मोच्चारणं गौरवं प्रतिभाति अतिप्रसङ्गञ्च भवति लघौ गुरौ तदभावादिति नियमेन तस्य उपेक्षा भवति

[6] व्युत्पत्तिवादः प्रथमाविभक्त्यर्थनिरुपणम् पृष्ठसंख्या 1
[7] व्युत्पत्तिवादः दीपिकाटीका पृष्ठसंख्या 1
[8] लघुशब्देन्दु शेखरः कारकप्रकरणम् पृष्ठसंखअया 416

यदुच्चारितं पदं वर्तते तदेव व्याप्यतावच्छेदकतया अङ्गीकार्या। तथा च श्रावणप्रत्यक्षसमवायसम्बन्धेन व्याप्यतावच्छेदकमपि स्वीकार्यमिति तेन समवायसम्बन्धावच्छिन्नोपस्थितिनिष्ठव्यापकता तादृशव्यापकतावदुपस्थितिविषयताश्रयत्वं प्रातिपदिकार्थत्वं स्वीकृत्य नियतोपस्थितिकत्वं स्वीक्रियते। अज्ञातशक्तिबोधः घटविषये यस्य पुरुषस्य तस्य पार्श्वे घटोच्चारणं स्यात् तदा अगृहीतकस्य बोधस्य घटविषये श्रावणप्रत्यक्षसत्वेऽपि शाब्दबोधः न भवितुमर्हति यतो हि अत्र श्रावणप्रत्यक्षस्य समवायसम्बन्धेन अबोधशक्तिकस्य शक्तिमान् समवायसम्बन्धेन आत्मनि बोधाभावात् एकसत्वे द्वयन्नास्ति इति नियमेन उभयसम्बन्धोच्चारितस्य असत्वात् तत्र तस्य व्यापकत्वदोषः अनियतलिङ्गस्थले बधिरपुरुषस्य समीपे तटोच्चारणे शक्तिग्रहाभावात् प्रातिपदिकार्थत्वं न स्यादित्यपास्तम् ।

ननु किदृशी व्याप्यता स्वीकार्या प्रातिपदिकत्वरुपं अथवा तद्वक्तित्वेन। प्रथमं तु स्वीकर्तुं नैव शक्यते तत्र प्रातिपदिकव्याप्यता स्वीकारे तद्यक्तित्वस्य औचित्यं नास्ति अतः तदानुपूर्वीरुपमेव प्रातिपदिकनिष्ठत्वेन व्याप्यता स्वीकारे दोषः नास्ति। यदि कश्चन पुरुषः गौरुच्चारणे सति तदर्थशक्तिबोधः श्रावणप्रत्यक्षानन्तरं भवति श्रावणप्रत्यक्षविषयतायाः समवायसम्बन्धेन शक्तिज्ञानसमवायित्वञ्च उभयवैशिष्ट्यञ्च आत्मनि गौरित्यादि प्रातिपदिकं वर्तते गौ इत्यत्र गोत्वसमवायसम्बन्धेनोपस्थितिः भवति। तस्मिन्नेव काले अन्यपदार्थस्य बोध एव स्यात् घटादिपदार्थानां बोधः तन्निष्ठव्याप्यतानिरुपितत्वेन समवायसम्बन्धावच्छिन्नत्वेन व्यापकतावदुपस्थितिः घटस्य स्यात् गौरित्यादाविव चेदतिप्रसङ्गः अतः प्रातिपदिकार्थविषये व्यापकतावदुपस्थितिविषयताश्रयत्वं स्वीकार्यं तेन गौः पदजन्यगोत्वप्रकारकस्य बोधः अन्यपदार्थबोधः क्रियते, कदाचित् तदा घटादिभाने बोधेऽपि श्रावणप्रत्यक्षसमवायसम्बन्धेन शक्तिबोधत्वेन गौरित्यादि अधिकरणस्य कालान्तरोच्चारणसत्वे सति गौरित्यादिविषयोपस्थितिः अधिकरणत्वेन आत्मनि एव स्यात् तस्मिन् काले घटपदार्थबोध असम्भवः एव ।

अपि च कश्चन पुरुषः पदादिपदार्थानां शक्तिजाता किन्तु वर्तमानकाले बुद्धौ न आयाति विस्मृतः अथवा संस्कारे न आयाति तस्य बोधस्य सत्वेऽपि पटादिपदार्थानां बोधः श्रावणप्रत्यक्षसत्वेऽपि न भवति तस्य निराकरणं कथमिति चेदुच्यते तस्मिन् विषये तु प्रातिपदिकनिष्ठव्याप्यतानिरुपितव्याप्यतोपस्थितिः सम्भवः न भवति। किन्तु तदा स्वनिष्ठशक्तिविषयकोदबुद्धसंस्कारसमवायित्वं सम्बन्धेन व्याप्यतावच्छेदकं स्वीकृत्य विस्मृतस्य शक्तेः बोधः कर्तुं शक्यते इति व्यापकतावदुपस्थिति तत्रापि पुरुषस्य आत्मनि तन्निष्ठशक्तिज्ञानविषयकोदबुद्धसंस्कारसमवायसम्बन्धेन स्वीक्रियते दोषः नास्ति।

वैयाकरणैः क्रियामुख्यविशेष्यकस्यैव शाब्दबोधः स्वीक्रियन्ते वाक्ये च सर्वत्र शाब्दबोधस्य प्रातिपदिकव्यापकतया शाब्दबोधः क्रियायामेव उपस्थितिः सत्वात् सर्वमपि वाक्यं क्रियायां परिसमाप्यते अनेन वाक्येन मुख्यतया क्रियायामेव मुख्यविशेष्यकस्य सत्वात् प्रातिपदिकव्यापकशाब्दबोधत्वे क्रियायाः प्रातिपदिकार्थत्वापत्तिः। ये

नैयायिकाः क्रियाविशेष्यकशाब्दबोधः न स्वीकुर्वन्ति तेषां मतेऽपि पदार्थद्वयसम्बन्धस्य प्रातिपदिकव्यापकशाब्दबोधविषयस्य शाब्दबोधे सत्वात् प्रातिपदिकार्थस्यापत्तिः त्वस्त्येव क्रियायामिति चेदुच्यते यदि प्रातिपदिकार्थनिष्ठव्याप्यतानिरुपित- व्यापकतावदुपस्थितिविषयताश्रयत्वेऽपि प्रातिपदिकार्थशक्तिनिरुपकत्वं स्वीक्रियते तदा न दोषः यतो हि क्रियायां प्रातिपदिकार्थनिष्ठशक्तिनिरुपकत्वं नास्ति अतेव न क्रियायाः प्रातिपदिकार्थत्वापत्तिः दोषः ।

पदार्थद्वयमध्येसम्बन्धतया तेन प्रकारेण विषयताश्रयत्वं स्वीकृत्य आकाङ्क्षतया सम्बन्धः द्योतते तत्र च प्रातिपदिकार्थनिष्ठशक्तिनिरुपकत्वं संसर्गे नास्ति अत एव नास्ति दोषः। अपि च प्रातिपदिकार्थसूत्रे प्रातिपदिकार्थनिष्ठशक्तिनिरुपकत्वेन तु लिङ्गग्रहणस्य बोधः स्वयमेव सिद्धः पुनः सूत्रे लिङ्गग्रहणं व्यर्थमिति स्यात् तदोच्यते लिङ्गे व्यापकतावदुपस्थितिविषयताश्रय अर्थात् व्याप्यतानिरुपितव्यापकतावदुपस्थितिः लिङ्गे नास्ति अतेव अतिप्रसङ्गः नास्ति। तथा प्रातिपदिकार्थसूत्रे प्रातिपदिकार्थस्य अर्थः नियतोपस्थितिकः तत्र च उपस्थितिपदार्थस्य स्मरणमर्थः स्वीकार्यः अथवा शाब्दबोधरुपार्थकमिति तत्र प्रथमं स्मरणमित्युक्ते न समीचीनं यतो हि तटादिपदार्थेन लिङ्गत्रयाणामुपस्थिति आकाङ्क्षादिज्ञानं युगदेव उपस्थितिः न भवति किन्तु

लिङ्गत्रयाणामुपस्थिति व्यापकतावदुपस्थिति तेन लिङ्गग्रहणं व्यर्थमिति तस्मात् स्मरणार्थकमुपस्थितिपदार्थस्यार्थः नैव स्वीकर्तुं शक्यते

नवीनवैयाकरणाभिमते

नवीनवैयाकरणाः नियतोपस्थितिकत्वं प्रातिपदिकार्थत्वमिति न स्वीकुर्वन्ति। अपितु नागेशभट्टाः प्रवृत्तिनिमित्ततदाश्रयत्वरुपमेव प्रातिपदिकार्थत्वं स्वीकुर्वन्ति। अस्मिन् विषये नागेशेनोक्तं लघुशब्देन्दुशेखरे **परे त्वत्र सूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्च तेषामाशयश्च**[9] तेषामाशयः प्रातिपदिकार्थपदार्थेन प्रवृत्तिनिमित्तं तदाश्रयश्च तेषामाशयः प्रातिपदिकार्थसूत्रे लिङ्गग्रहणं स्वीकारात् प्रातिपदिकार्थस्य नियतोपस्थितिकरुपस्य स्वीकाराक्षेया –

**एकं द्विकं त्रिकं चैव चाथ चतुष्कं पञ्चकन्तथा ।**
**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरुपिताः।।**[10]

इति भाष्यप्रामाण्येन त्रिकं चतुष्कं पञ्चकं वा प्रातिपदिकार्थः स्वीकारे सति लिङ्गग्रहणं व्यर्थं तथा च द्विकं प्रातिपदिकार्थस्याङ्गीकारे लिङ्ग्रहणं सार्थकमिति विचार्यते। अपि च सरुपसूत्रभाष्ये जातिविशिष्टव्यक्तेरेव

---
[9] लघुशब्देन्दुशेखरः षट्टीकोपेतः कारकप्रकरणम् पृष्ठसंख्या 616
[10] वैयाकरणभूषणसारः नामार्थप्रकरणम् कारिकासंख्या 25 पृष्ठसंख्या 232

प्रातिपदिकार्थत्वं कथ्यते। तथाहि **सरुपाणामेकशेषएकविभक्तौ** इति सूत्रे भाष्यकारेणोक्तं **नह्याकृतिपदार्थस्य द्रव्यं न पदार्थः द्रव्यपदार्थस्याकृतिर्न पदार्थः**[11] इत्युक्ते सति

किञ्चित् प्रधानं वर्तते अन्यदुत्तरभाष्ये विहितं पूर्वोक्तनुसारेण तत्र शब्दानां जातिविशिष्टव्यक्तावेव शक्तिबोधकं तेन च विशिष्टं नामार्थः सङ्गच्छते। अतः जाति तदाश्रयश्च प्रातिपदिकार्थः। ननु नित्यत्वे सति अनेकसमवेतत्वं जातिपदार्थस्य लक्षणं स्वीक्रियते तर्हि आकाशत्वादीनामपि नित्यत्वाच्च आकाशस्य एकत्वे सति तस्यानेकत्वाभावात् जातिलक्षणस्य प्राप्तिः तस्य प्रातिपदिकार्थत्वे न स्यादिति चेन्न नामार्थपक्षे तत्प्रवृत्तिनिमित्तपरं वर्तते तथा च शब्दस्याश्रयस्तु आकाशत्वं तस्य चानेकसमवेतत्वाभावे सति आकाशपदप्रवृत्तिनिमित्तत्वाच्च तस्याकाशस्य प्रातिपदिकार्थत्वं सेत्स्यति।

ननु गौर्वाहिकः वाक्यस्थले तु गो शब्दात् प्रथमाविभक्तेः प्राप्तिः न स्यादिति यतो हि प्रवृत्तिनिमित्ततदाश्रयस्य तत्र स्थले अन्यत्पदान्तरस्योपस्थितिसम्बन्धः सत्वात् प्रागेव शक्यार्थमादाय प्रथमाकृते पश्चात् पदान्तरवैशिष्ट्यस्य लक्षणार्थोपस्थितिसंस्कारस्य जाते बाधस्यासम्बन्धात् च प्रथमा विभक्तिश्च सिद्धयति। तथा वैयाकरणाः शक्यतावच्छेदकारोपरुपां लक्षणां स्वीकृत्य गोपदेन तन्निष्ठशक्यतावच्छेदकस्य गोत्वस्य वाहीके आरोपे सति क्षतिः नास्ति। तच्चोक्तम् शेखरकारेण **स च मुख्य इव आरोपिततदाश्रयोऽपि।** [12] तस्मादेव गोपी पदार्थे स्वादिप्रकृतेर्लाक्षणिकत्वे सति दोषः नास्ति ।

**सहायकग्रन्थाः**


1.प्रौढमनोरमा भट्टोजिदीक्षितः

2. व्युत्पत्तिवादः गदाधरभट्टाचार्यः

3.वैयाकरणभूषणसारः कौण्डभट्टः

4.लघुशब्देन्दुशेखरः नागेशभट्टः

5.पाणिनीयाष्टाध्यी पाणिनि


---

[11] महाभाष्ये सरुपसूत्रे पृष्ठसंख्या 98

[12] लघुशब्देन्दुशेखरः षट्टीकोपेतः कारकप्रकरणम् पृष्ठसंख्या 616